दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-57 | 1 | दिसम्बर 19, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् पौषकृष्णामावस्या
पौषः ०४ प्रविष्टांशः मङ्गलमयः भवेत्


2 भूस्खलनस्य संकटः, सुरक्षाभित्तीनाम् उच्चता अपि न्यूना, प्रियंकागांधी लोकसभायां चंडीगढ़- शिमला- चतुष्पंक्तिराजमार्गस्य विषयमुत्थापितवती

3 देशस्य प्रथमः 'रेड कार्पेट' एनएच मध्यप्रदेशे निर्मितः अस्ति, गडकरी इत्यस्य वन्यजीवानां उद्धाराय अद्वितीयः प्रयोगः

4 स्वामिविवेकानन्द-कनिष्ठमहाविद्यालये "युवास्पन्दन-२०२५" इति स्नेहसंमेलनस्य हर्षोल्लासेन उद्घाटनम्


# प्रधानमन्त्री नरेन्द्रमोदी ओमान-देशस्य सर्वोच्च-नागरिक-सम्मानेन ऑर्डर-ऑफ ओमान इत्यनेन सम्मानितः



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी ओमान-देशस्य सर्वोच्च-नागरिक सम्मानेन आर्डर-ऑफ ओमान इत्यनेन सम्मानितः। मस्कट-नगरे भारत-ओमान-देशयोः मध्ये ऐतिहासिक-व्यापक-आर्थिक-सहभागिता-सन्धिपत्रेषु हस्ताक्षराणि जातानि । श्रीमोदी अवदत् यत्, भारते विविधता एव तस्य संस्कृतेः दृढः आधारः अस्ति, तथा च भारतीयानां कृते प्रतिदिनं नूतनवर्णम् आनयति, प्रत्येकः ऋतुः नूतनः उत्सवः भवति, प्रत्येकः परम्परा नवविचारेण आगच्छति। प्रधानमन्त्री स्वस्य ओमानदेशस्य यात्रायाः द्वितीये दिने मस्कट-नगरे मैत्रीपर्व इत्येतस्मिन् कार्यक्रमे भारतीयसमुदायं छात्रान् च सम्बोधयन् आसीत्। प्रधानमन्त्री अवदत् यत्, भारतीयाः यत्र तत्र गच्छन्ति, यत्र तत्र निवसन्ति, ते विविधतायाः सम्मानं कुर्वन्ति। सः अवदत् यत्, भारतीय-प्रवासिनः सह-अस्तित्वस्य सहकारस्य च सजीवोदाहरणानि सन्ति। 'मैत्रीपर्व' इति कार्यक्रमः ओमान देशे भारतीय-शिक्षा-व्यवस्थायाः पञ्चाशत् वर्षाणां समापन-उत्सवम् आचरति। सः अवदत् यत् मैत्रीपर्वः द्वयोः देशयोः मध्ये मित्रता, तेषां संयुक्तस्य इतिहासस्य, समृद्धस्य च भविष्यस्य उत्सवः अस्ति। गत प्रातःकाले, प्रधानमन्त्री मस्कट-नगरे भारत-ओमान-व्यापार-शिखरसम्मेलनं सम्बोधितवान्, यत्र उभयोः देशयोः व्यापार-प्रमुखाः उपस्थिताः आसन्। सः अवदत् यत्, शिखरसम्मेलनम् उभयोः देशयोः मध्ये द्वैपाक्षिकसम्बन्धेषु नूतनां दिशां गतिं च प्रदातुं शक्नोति । भारत-ओमान-व्यापार-शिखरसम्मेलनं सम्बोधयन् प्रधानमन्त्री उक्तवान् यत्, ऋतोः परिवर्तनं भवितुं शक्नोति, परञ्च भारत-ओमान-देशयोः मित्रता कालान्तरेण दृढतया वर्धिष्यति।

**सुभाषितम्**

**उपकर्तुमप्रकाशं क्षन्तुं,**
**न्यूनेष्वयाचितं दातुम्।**
**अभिसंधातुं च गुणैः,**
**शतेषु केचिद्विजानन्ति।।**

अर्थात्- अपने को बिना प्रकट किए उपकार करना, छोटों को क्षमा कर देना, बिना मांगे देना, गुणों से प्रेम करना ये सभी सद्गुण बहुतों में से कुछ लोग ही आचरित कर पाते हैं।


दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## लोकसभायां विकसितभारत-जी. राम जी. विधेयकं विंशति-पञ्चविंशति स्वीकृतम्



**हिमसंस्कृतवार्ताः** - लोकसभायां विकसितभारत-वृत्यावसर प्रत्याभूतिः तथा आजीविका मिशन (ग्रामीण) विकसितभारत- जी. राम. जी. विंशति पञ्चविंशति इति विधेयकं स्वीकृतम्। एतत् विधेयकं विंशतिवर्षाणां प्राचीनस्य महात्मागान्धी-राष्ट्रिय-ग्रामीण-रोजगार-प्रत्याभूति-पंचोत्तरद्विसहस्र अधिनियमस्य स्थाने भविष्यति। सप्तचत्वारिंशदधिक-द्विसहस्र विकसितभारत इत्यस्य राष्ट्रियदृष्टिकोणेन सह संरेखितस्य ग्रामीणविकासस्य संरचनायाः स्थापनायै विधेयकं प्रयुज्यते। अस्य विधेयकस्य अन्तर्गतं प्रत्येकस्मिन् ग्रामीणपरिवाराय, यस्य वयस्काः सदस्याः कुशल-शारीरिक-कार्यं कर्तुं स्वेच्छया इच्छन्ति, तेभ्यः प्रत्येकस्मिन् वित्तीयवर्षे पञ्चविंशत्यधिकैकशत-दिवसानां वेतन- वृत्यावसरस्य वैधानिक-प्रत्याभूतिः प्रदीयते। विधेयकस्य विषये चर्चायाः प्रत्युत्तरे केन्द्रीयग्रामीणविकासमन्त्री शिवराज सिंह चौहानः अवदत् यत्, प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे मनरेगा योजना समुचित प्रभावीरूपेण च कार्यान्विता अस्ति। मनरेगा इत्यस्य अन्तर्गतं यू. पी. ए. सर्वकारेण केवलं त्रयोदश-सहस्राधिक द्विलक्ष-कोटिरूप्यकाणि व्ययः कृतः, तत्रैव नरेन्द्रमोदी-सर्वकारे त्रिपञ्चाशत्सहस्राधिक-अष्टलक्ष-कोटिरूप्यकाणि व्ययः अभवत्।

## नवदेहल्यां भारत-नीदरलैंड-देशौ स्वतन्त्रं, मुक्तं, नियम-आधारितं च हिन्द-प्रशांत-क्षेत्रं प्रति प्रतिबद्धतां पुनः दृढी-कृतवन्तौ



**हिमसंस्कृतवार्ताः** - नीदरलैंड-देशस्य विदेश मन्त्री डेविड वैन-वील इत्येषः नवदेहल्याः साउथ-ब्लाक इत्यत्र रक्षामन्त्रिणा राजनाथसिंहेन सह मिलितवान्। उभौ भारत-नीदरलैंड द्वैपाक्षिकसम्बन्धान् इतोऽपि सुदृढं विविधीकरणं च कर्तुं सन्धिपत्राणाम् आदानप्रदानं कृतवन्तौ। अद्य नवदिल्ल्यां भारत-नीदरलैंड-देशौ स्वतन्त्रं, मुक्तं, नियम-आधारितं च हिन्द-प्रशांत-क्षेत्रं प्रति प्रतिवद्धतां पुनः दृढी-कृतवन्तौ। राष्ट्रिय-राजधान्यां स्वस्य एकदिवसीय यात्रायाम्, सः पश्चात् विदेश-मन्त्रिणा डा. एस. जयशङ्करेन सह अपि मेलिष्यति इति अपेक्षास्ति।

## नवदिल्ल्यां वायुसेनायाः कमाण्डर्स-सम्मेलनम् संबोधितवान् रक्षामंत्री राजनाथसिंहः

**हिमसंस्कृतवार्ताः** - रक्षामंत्री राजनाथसिंहः दृढतया उक्तवान् यत् ऑपरेशन-सिन्दूर- अभियानेन भारतस्य उत्कृष्ट-प्रभावं, अल्पकालिक-प्रचालन-क्षमतां प्रदर्शितम्। नवदिल्ल्यां वायुसेनायाः कमाण्डर्स-सम्मेलनम् संबोधयन् मन्त्रिणा ऑपरेशन् सिन्दूर अभियानस्य समये प्रभावीरूपेण प्रयुक्तस्य भारतस्य वायु-रक्षा-व्यवस्थायाः उपकरणानां च प्रदर्शनस्य प्रशंसा कृता। श्रीसिंहः भविष्यस्य प्रत्येकस्यामं परिस्थित्यां अभियानेन शिक्षितुं उक्तवान्। सः भारतीय वायुसेनायाः सौर्यस्य, वेगस्य, यथार्थतायाः च प्रशंसाम् अकरोत्।

## वायु-प्रदुषणं निवारणाय दिल्ली-नगरे पेट्रोल पम्प्स इत्यत्र वैध- प्रदूषण-नियंत्रण-प्रमाणपत्रं विना वाहनानां कृते इन्धन प्रदानं न भविष्यति

**हिमसंस्कृतवार्ताः** - देहल्याः मन्त्री परवेश-साहिब-सिंहः पूर्वतनस्य आम आदमी पार्टीति सर्वकारस्य तथा पूर्वमुख्यमन्त्रिणः अरविन्द केजरीवालस्य उपरि गत एकादशवर्षेषु राष्ट्रिय-राजधान्यां वर्धमानस्य वायु-प्रदूषणस्य स्तरस्य न्युनिकरणे किमपि न कृतम् इति आरोपितवान्। नवदेहल्यां वार्ताहरसम्मेलनं सम्बोधयन्, सः आम आदमी दलं प्रदूषण नियंत्रणाय किमपि कर्तुं असमर्थः अस्तीति आरोपितवान्। अद्यारभ्य, सम्पूर्ण दिल्ली-नगरे पेट्रोल पम्प्स् इत्यत्र, पी. यू. सी. इति वैध-प्रदूषण-नियन्त्रण-प्रमाणपत्रं विना वाहनानां कृते इन्धनस्य वितरणम् न भविष्यति। पी. यू. सी. सी. इत्यस्य, नियमस्य अनुपालनस्य च निरीक्षणं कैमरा-आधारित-प्रणाल्या प्रचलति।

# भूस्खलनस्य संकटः, सुरक्षाभित्तीनाम् उच्चता अपि न्यूना, प्रियंकागांधी लोकसभायां चंडीगढ़- शिमला- चतुष्पंक्तिराजमार्गस्य विषयमुत्थापितवती



**हिमसंस्कृतवार्ताः- नवदेहली।** चण्डीगढ़ेन शिमलानगरेण च सम्बद्धस्य चतुष्पंक्तिराजमार्गस्य विषयः गुरुवासरे लोकसभायां उत्थापितः। वायनाडतः सांसदा, अखिलभारतीय- काङ्ग्रेससमितेः महासचिवः प्रियङ्का वाड्रा इत्यनया एषः विषयः उत्थापितः। प्रियङ्का वाड्रा इत्यनया उक्तं यत् चण्डीगढतः शिमलापर्यन्तं (चण्डीगढ-परवाणू-शिमला) सुरक्षाभित्तीनाम् उच्चता अतीव न्यूना अस्ति। अनेन अनेकस्थानेषु भूस्खलनस्य घटनाः बहुधा भवन्ति। सा केन्द्रीयमन्त्रिणः नितिनगडकरी इत्यस्य ध्यानं अस्मिन् विषये आकृष्य तत्कालं कार्यविधिं कर्तुम् आग्रहं कृतवती। परवाणुतः शिमलापर्यन्तं चतुष्पंक्तिराजमार्गस्य निर्माणं त्रिषु चरणेषु अस्ति। प्रथमचरणं सम्पन्नम् अस्ति, द्वितीयतृतीयचरणयोः कार्यं सम्प्रति प्रचलति। परवाणुतः सोलानपर्यन्तं सम्पन्नकार्येषु अनेकानि क्षेत्राणि सन्ति यत्र भूस्खलनस्य संकटः अतीव अधिकः अस्ति। वर्षर्तौ अनेकस्थानेषु भूस्खलनं जातम्, येन महती क्षतिः अभवत्।

## अनिरुद्धसिंहः अपि प्रश्नान् उत्थापितवान्

पंचायतीराजः ग्रामीणविकासमन्त्री अनिरुद्धसिंहः च चतुर्ष्पंक्तिराजमार्गनिर्माणे अनियमिततायाः विषयं अपि उत्थापितवान्। राज्यसर्वकारेण एनएचएआई इत्यस्मै अपि अनेकवारम् एषः विषयः उत्थापितः अस्ति। चतुर्मार्गनिर्माणार्थं कर्तने ऋजुतया पर्वतानाम् अन्तः कर्तनं भवति स्म। स्थापितासु सुरक्षाभित्तिषु अति न्यूना ऊर्ध्वता भवति, येन बहुधा भूस्खलनं भवति। अनेकस्थानेषु एकपार्श्वे मार्गः निरुद्धः अस्ति।

## हिमाचलेन अस्ति सम्बन्धः प्रायः शिमलाम् आगच्छति प्रियंका गांधी

प्रियङ्का गांधी इत्यस्याः गृहं शिमलासमीपे छराबड़ायां अस्ति। सम्पूर्णः गान्धीपरिवारः अवकाशदिनानां कृते अत्र बहुधा आगच्छति। ते अधिकतया चण्डीगढतः मार्गेण शिमलानगरम् आगच्छन्ति। सा मार्गस्य स्थितिं सम्यक् जानाति, अतः एव सा सदने एतत् विषयं उत्थापितवती।

# काङ्गड़ा-चम्बातः चयनितसैनिकानां सर्वाधिकसंख्या




**हिमसंस्कृतवार्ताः- पालमपुरम्।** सेनानियुक्तिकार्यालयेन (एआरओ), पालमपुरेण भारतीयसेनायां नियुक्त्यर्थं काङ्गड़ा-चम्बा-जनपदाभ्यां सर्वाधिकसंख्याकानाम् अभ्यर्थीनां चयनं कृत्वा ऐतिहासिकम् अभिलेखं प्राप्तम्। नियुक्तिकार्यालयस्य निदेशकः कर्णेलविशालशाहः अवदत् यत् प्रथमे वर्गे १,२३३ चयनित-अभ्यर्थिनः देशे सर्वत्र विभिन्नेषु प्रशिक्षणकेन्द्रेषु प्रेषिताः सन्ति, यत्र तेषां सैन्यप्रशिक्षणं पूर्वमेव आरब्धम् अस्ति। एतस्याः उपलब्धेः आधारेण जनवरीमासे प्रथमसप्ताहे द्वितीयसमूहे प्रायः ४७२ अधिकाः चयनिताः अभ्यर्थिनः प्रशिक्षणकेन्द्रेषु प्रेषिताः भविष्यन्ति। सेनानियुक्तिकार्यालयः पालमपुरम् इत्यनेन उपायुक्तः हेमराज बैरवा, एडीएम शिल्पी बेक्टा, एसडीएम मोहित रत्नः चेत्येतेषां सहकार्याय, समन्वयाय, समर्थनाय च आभारं प्रकटितम्। एषा विलक्षणसफलता काङ्गड़ा-चम्बा-मण्डलयोः युनां राष्ट्रसेवायै उच्चप्रेरणायाः, अनुशासनस्य, उत्तमसज्जतायाः च प्रदर्शनं करोति एआरओ, पालमपुरस्य प्रभावी जनसम्पर्कस्य, पारदर्शी चयनप्रक्रियायाः, समर्पितप्रयत्नस्य च प्रत्यक्षं परिणामः अस्ति। सेनानियुक्तिकार्यालयस्य, पालमपुरस्य सम्पूर्णं दलं सर्वेषां चयनितानाम् अभ्यर्थीनां, तेषां परिवाराणां च हार्दिकम् अभिनन्दनं करोति, उज्ज्वलं, गौरवपूर्णम्, अनुशासितं च सैन्यजीवनाय शुभकामनाम् अयच्छत्

# राष्ट्रीयहरिताधिकरणेन सुन्नीबन्धपरियोजनायाः विषये उपालम्भस्य निस्तारणं कृतम्, प्रदूषणनियन्त्रणमण्डलाय प्रदत्तः निर्देशः




**हिमसंस्कृतवार्ताः - शिमला।** शिमलामण्डलस्य तहसीलसुन्नी इत्यत्र सुन्नीबन्धजलविद्युत्परियोजनायां विस्फोटकार्यक्रमेषु सतलुजनद्याः कथितरूपेण मलिनावशेषस्य निक्षेपणविषये उपालम्भस्य विषये नवीदिल्लीनगरस्य राष्ट्रियहरितन्यायाधिकरणस्य प्रधानपीठिकया निस्तारणं कृतम्। उपालम्भः जूनमासस्य ६ दिनाङ्के प्रवेशितः अभवत्। राष्ट्रियहरिताधिकरणेन श्रवणसमये प्राप्तं यत् परियोजनया सम्बन्धितानाम् उपालम्भानां मूलावेदनसंख्यायां 363/2023 इत्यत्र पूर्वमेव निस्तारणं कृतम् यद् मीरा ठाकुर द्वारा प्रवेशितमासीत्।

हिमाचलप्रदेश- प्रदूषणनियन्त्रणमण्डलस्य तथा जिलावनपदाधिकारिणः शिमला इत्यस्य संयुक्तसमित्या पूर्वमेव निरीक्षणं कृत्वा स्वस्य प्रतिवेदनं प्रदत्तम् अस्ति। प्राधिकरणेन इदमपि स्पष्टीकृतं यत् एतादृशम् उपालम्भं यः उत्थापयति, परन्तु कथितानाम् उल्लङ्घनानां सटीकस्थानानि न निर्दिश्य नूतनम् आवेदनं स्वीकार्यं नास्ति।अवशिष्टानाम् उपालम्भानां वा अनुपालनस्य वा सन्दर्भे आपत्कालीन-अथवा निष्पादन-अनुप्रयोगस्य माध्यमेन समुचित- उपायाः उपलभ्यन्ते। आवेदकस्य राज्य- प्रदूषण- नियन्त्रणमण्डलस्य सदस्यसचिवे विस्तृतोपालम्भं दातुम् अनुमतिः प्राप्ता अस्ति। यदि एतादृशः उपालंभः प्रवेशितः भवति तर्हि प्रदूषणनियन्त्रणमण्डलाय विधानानुसारं समुचितं कार्यविधिं कर्तुं निर्देशः दत्तः अस्ति।

# एचआरटीसी कर्मचारिणां कृते वर्धिता वेतनयोजना आरब्धा, अनेके लाभाः प्रदीयन्ते; पीएनबी एचआरटीसी इत्यनयोः सहमतिपत्रे हस्ताक्षरम्



**हिमसंस्कृतवार्ता कुन्दनशर्मा।** गुरुवासरे पीएनबी-एचआरटीसी इत्यनयोर्मध्ये सहमतिपत्रे हस्ताक्षरं कृतम्। उपमुख्यमन्त्री मुकेश-अग्निहोत्री, एसीएसपरिवहनम् आरडी नाजिम, पीएनबी संस्थायाः क्षेत्रीयः व्यवस्थापकः राजेशकुमारः, एचआरटीसी संस्थायाः प्रबन्धनिदेशकः डॉ. निपुणजिन्दलः इत्येतेषाम् उपस्थितौ गतगुरुवासरे सन्धेः हस्ताक्षराणि जातानि। अस्य सन्धेः उद्देश्यं विशेषवेतनलेखयोजनायाः उपलब्धता हिमाचलपथपरिवहननिगम संस्थायाः कर्मचारिभ्यः भवेत्। अनेन तेभ्यः अनेके लाभाः मिलिष्यन्ति। इयं वेतनयोजना एचआरटीसी-कर्मचारिभ्यः नियमितरूपेण अनुबन्धिकरूपेण च व्यापकवित्तीयसुरक्षा, आधुनिकबैङ्किंगसुविधाः, जीवनशैलीलाभानां च समूहं प्रदास्यति, येन तेषां वित्तीयस्थिरता महत्त्वपूर्णतया वर्धते।



# HP Cabinet Meeting -३० दिनाङ्के भविष्यति हिमाचलमन्त्रिमण्डलस्य गोष्ठी

हिमसंस्कृतवार्ताः - शिमला।

हिमाचलप्रदेशमन्त्रिमण्डलस्य गोष्ठी ३० दिसम्बर् दिनाङ्के प्रातः ११ वादने शिमलानगरस्य राज्यसचिवालये भविष्यति। मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः अध्यक्षतायां अस्यां सभायाम् अनेके महत्त्वपूर्णाः निर्णयाः भविष्यन्ति। स्वास्थ्य-शिक्षा-सहित-विभिन्न-विभागेषु रिक्त-पदानां पूरण-विषये निर्णयाः क्रियन्ते। नूतनवर्षे कार्यान्वितुं योजनानां विषये अपि निर्णयाः भविष्यन्ति। मन्त्रिमण्डलस्य सत्रे कर्मचारिभिः, पेन्शनभोगिभिः च सम्बद्धाः घोषणाः अपि कर्तुं शक्यन्ते

# नारीतः नारायणी" परिषदा सांस्कृतिकशक्तये नेतृत्वप्रदर्शनाय च भारतीयमहिलानाम् एकीकरणस्य आह्वानम्




**हिमसंस्कृतवार्ताः।** अग्रिमे मासे मार्चमासे निर्धारितस्य "नारीतः नारायणी" "भारती" इत्यस्य बहुप्रतीक्षितं जालप्रक्षेपणं गतदिवसे एव विदुषां गौरवपूर्णसमागमस्य उपस्थितौ सफलतया सम्पन्नम्। कार्यक्रमस्य आरम्भः श्रीमती नागश्रीद्वारा मङ्गलाचरणेन (आह्वानेन) अभवत् । सूत्रधारा डॉ. चारू कालरा इत्यनया स्वागतभाषणं कृतम्, अस्य उपक्रमस्य दृष्टिः महत्त्वं च वर्णितम्।

तदनन्तरं सम्मेलनस्य कार्यक्रमनिदेशिका, कर्णाटकसंस्कृतविश्वविद्यालयस्य बेङ्गलूरुः इत्यस्य शास्त्रसंकायस्य प्राध्यापिका, अधिष्ठाता च प्रो.शिवानी वी. स्वपरिचये परिषदः भूमिकां विस्तरेण उक्तवती। सा "भारती" इत्यस्य अवधारणायाः अवधारणात्मकपृष्ठभूमिं शैक्षणिकसान्दर्भिकतां च वाग्मितापूर्वकं व्याख्यातवती, समाजस्य, राष्ट्रस्य, विश्वस्य च विकासे विविधक्षेत्रेषु महिलानां योगदानं प्रकाशितवती सम्मेलनस्य संयोजिका प्रो.शिवानी इत्यनया उक्तं यत् देशे सर्वत्र महिलासङ्घटनानां एकीकरणं कृत्वा महिलानां उपलब्धीनां उत्सवं कर्तुं, तेषां दृष्टिकोणं अवगन्तुं, तेषां समस्यानां निवारणार्थं कार्यं कर्तुं च अस्य उपक्रमस्य उद्देश्यम् अस्ति। सा अवदत् यत्, "विविधक्षेत्रेषु महिलानां योगदानस्य सम्मानं कृत्वा तेषां शक्तिं संयोजयित्वा वयं 'महिलानां संयोजनद्वारा भारतं सम्बद्धं कर्तुं' लक्ष्यं कुर्मः। " सा वैश्विकमहिलानेतृभ्यः अपि आह्वानं कृतवती यत्, "भारतं विश्वनेतृत्वेन पुनः स्थापयितुं विश्वस्य महिलानेतृभिः अस्मिन् आन्दोलने सम्मिलितव्यम्। भारतस्य सांस्कृतिकशक्तयः महिलानां व्यावसायिक उपलब्धयः च प्रदर्शयितुं, तथैव भविष्यत्सन्ततीनां कृते व्यावहारिकसमाधानं प्रेरणाञ्च प्रदातुं मञ्चरूपेण एतत् सम्मेलनं परिकल्पितम् अस्ति। जालस्थलस्य औपचारिकम् उद्घाटनं आदरणीया सुश्री शान्ताक्का इत्यनया कृतम्।राष्ट्रीयसेवासमित्याः प्रमुखा आदरणीया सुश्रीशान्ताक्का इत्यनया स्वीये सम्बोधने दुर्गासप्तशत्याः एकं श्लोकं उद्धृत्य समकालीनभारतीयनारीत्वस्य अद्वितीयबलं प्रकाशितम्-

***सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि।**
**गुणाश्रये गुणमये नारायणि नमोऽस्तु ते॥**

सा ऐतिहासिकैः समकालीनैः च उदाहरणैः स्वदृष्टिकोणं कृतवती । पेप्सीको-संस्थायाः पूर्व-सीईओ-इन्द्र-नूयी-इत्यस्याः, जम्मू-नगरे उच्च-उच्चतायां सेतु-निर्माणस्य साहसिक-पराक्रमस्य अग्रणी-माधवी-लता-इत्येतयोः उद्धृत्य सा अवदत् यत् भारतीयाः महिलाः स्वस्य साहसेन, कौशलेन च सीमानः लङ्घयन्ति।


भारतस्य महान् नेतारः आकारं दत्तवत्यः महतीनां मातॄणाम् अपि सा स्मरणं कृतवती- स्वामीविवेकानन्दस्य माता भुवनेश्वरीदेवी, छत्रपतिशिवाजीमहाराजस्य माता जीजामाता, लोकमान्यतिलकं प्रभावयितृ पार्वतीबाई च। सा स्त्रियाः सहजतया सृजनशीलतायाः, गृहप्रबन्धनस्य, अन्यायविरुद्धयुद्धस्य च शक्तिः भवति इति बोधयति स्म। स्वामी विवेकानन्दस्य विचारान् निर्दिश्य शान्तक्का अवदत् यत् आदर्शभारतीया निःस्वार्थी, परोपकारी, सर्वेषां प्रति प्रेम्णा, अद्वितीयव्यक्तित्वस्य च युक्ता भवति। "नारीतः नारायणी" सम्मेलनस्य विषये सा आशां प्रकटितवती यत् एषा उपक्रमः महिलाशक्तेः एकीकृतव्यञ्जनस्य माध्यमं भविष्यति, भारतीयसंस्कृतेः सुदृढीकरणं करिष्यति, विविधक्षेत्रेषु महिलानां उपलब्धीनां व्यापकरूपेण प्रसारं करिष्यति, समाजं च प्रेरयिष्यति। "नारीतः नारायणी" परिषद् भारतीयमहिलानां एकीकरणाय सांस्कृतिकशक्तिं नेतृत्वं च प्रदर्शयितुं सफला भविष्यति। सा परिषदः सफलतायाः विषये आयोजकानाम् अभिनन्दनं कृतवती।तदनन्तरं डॉ. स्वाति बासापुर श्रीमती अरुणा च जालसंसाधनस्य लाइव प्रदर्शनं दत्तवत्यौ, येन उपस्थितानां कृते तस्य विशेषतानां उपयोगितायाः च व्यावहारिकदृष्टिः प्राप्ता।आयोजने विशिष्टानां गणमान्यजनानाम् शुभकामना (अभिनन्दनसन्देशाः) अपि अभवन्, ये अस्याः परियोजनायाः पृष्ठतः सामूहिकप्रयत्नानाम्, विकसितभारते महिलासशक्तिकरणस्य मञ्चं प्रदातुं तस्याः भूमिकायाः च प्रशंसाम् अकरोत्।

# कविकुलगुरुकालिदास-संस्कृतविश्वविद्यालये नवशब्दानां विषये राष्ट्रियकार्यशालायाः आयोजनम्




**हिमसंस्कृतवार्ताः नागपुरम्।** कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य रामटेकस्य, भारतीयभाषासमितेः,नवीदिल्लीनगरस्य च संयुक्ताश्रयेण, २०२५ तमस्य वर्षस्य डिसेम्बर्-मासस्य १९, २० दिनाङ्के च नवशब्दनिर्माणविषये द्विदिवसीय-राष्ट्रीयकार्यशालायाः आयोजनं क्रियते, अस्याः कार्यशालायाः उद्देश्यं आधुनिकविषयेषु तकनीकीपदानां कृते संस्कृतभाषायां नूतनानां शब्दानां निर्माणम् अस्ति।राष्ट्रियशिक्षानीतिः भारतीयभाषासु विज्ञानप्रौद्योगिक्यासहितविविधविषयेषु अध्यापनं प्रति विशेषं बलं ददाति । अतः विज्ञान-प्रौद्योगिक्याधारितपुस्तकानां भारतीयभाषासु विशेषतः संस्कृतभाषायां अनुवादं कुर्वन् तत्तद्विषयाणां तान्त्रिकसंकल्पनानां पदानां च कृते समुचितसंस्कृतशब्दानां निर्माणं कर्तुं शक्यते । अस्याः कार्यशालायाः उद्देश्यं नूतनशब्दानां निर्माणेन संस्कृतशब्दकोशस्य समृद्धीकरणं, नूतनशब्दानां अन्यभाषायाः कृते मानकं भवति, व्यावहारिकप्रयोगः च भवतु इति सुनिश्चितं भवति । 19 दिसम्बर् दिनाङ्के प्रख्यातसंस्कृतविद्वान् डॉ. भूषणकुमार-उपाध्यायस्य पूर्वपुलिस-आयुक्तस्य (कारागारस्य) उपस्थितौ कार्यशालायाः उद्घाटनं भविष्यति। आदरणीय कुलपतिः डॉ. अतुलवैद्यस्य प्रेरणायां आयोज्यायाम् अस्याः कार्यशालायाः समन्वयः वेदविद्यासंकायस्य अधिष्ठाता प्राध्यापकः हरेकृष्ण अगस्ती अस्ति, सहसंयोजकः च व्याकरणविभागस्य प्रमुखः डॉ. जयवंत चौधरी अस्ति। संस्कृत प्राध्यापकानाम्, शोधकर्तॄणां च कृते आयोजितायां कार्यशालायां अनेके विशिष्टाः विद्वांसः मार्गदर्शनं करिष्यन्ति।

# देशस्य प्रथमः 'रेड कार्पेट्' एनएच मध्यप्रदेशे निर्मितः अस्ति, गडकरी इत्यस्य वन्यजीवानां उद्धाराय अद्वितीयः प्रयोगः



**हिमसंस्कृतवार्ता।** देशे "हाईवेमैन्" इति नाम्ना प्रसिद्धेन केन्द्रीयमार्गराजमार्गमन्त्री नितिनगडकरी इत्यनेन अन्यः अद्वितीयः प्रयोगः कृतः । मध्यप्रदेशस्य एकस्मिन् मार्गे सः 'रक्तकालीनम्' स्थापितवान् अस्ति। एतत् मार्गं दृष्ट्वा भवन्तः निःसंदेहं चिन्तयिष्यन्ति यत् सामान्यतया कृष्णवर्णीयमार्गे रक्तखण्डाः किमर्थं सन्ति इति। किं मार्गस्य शोभनार्थं वा तस्य पृष्ठतः अन्यत् किमपि विशेषं कारणम् अस्ति ? ननु मध्यप्रदेशे अयं प्रयोगः कृतः अस्ति । प्रथमवारं राष्ट्रियराजमार्गम् ४५ इत्यत्र जबलपुर-भोपालमार्गे रक्तवर्णीयः टेबलटॉप इति मार्गः निर्मितः अस्ति। एनएचआईए-अधिकारिणा श्रवणकुमारसिंहेन उक्तं यत्, सागर, दमोह, नरसिंहपुरजनपदे त्रिसंघे स्थिते नौरादेही वन्यजीव अभयारण्ये जबलपुर-भोपाल-मार्गः द्वि-चतुर्-लेन-राजमार्गस्य ११.९६ किलोमीटर्-परिमितस्य... अद्वितीयरीत्या पुनर्विकसितः। भारते प्रथमवारं पञ्चमिलिमीटर्-पर्यन्तं रक्त-टेबलटॉप्-ब्लॉक-चिह्नानि प्रयुक्तानि अस्मिन् द्विकिलोमीटर्-परिमित-संवेदनशील-उपत्यकाक्षेत्रे, यत् प्रथमदृष्ट्या रक्त-कालीनम् इव दृश्यते वन्यजीवरक्षणं मनसि कृत्वा एषः उपायः निर्मितः आसीत् । रक्तखण्डाः कृष्णपृष्ठात् पञ्चमिलिमीटर् अधिकं भवन्ति । एतेन चालकानां ध्यानं आकर्षयति, रक्तपृष्ठस्य अधिकोच्चतायाः कारणेन वाहनेषु किञ्चित् कम्पनं भवति, येन जनाः स्ववेगं न्यूनीकर्तुं प्रेरिता भवन्ति। एतेन न केवलं वन्यजन्तुनां आघातः भवति, अपितु क्षेत्रं गच्छन्तः जनाः आकस्मिकवक्रतां प्राप्य दुर्घटनायाः सम्मुखं न करिष्यन्ति । वनं परितः राजमार्गस्य अस्मिन् खण्डे चेन-लिङ्क-वेष्टनम् अपि स्थापितं अस्ति । अपि च, यातायातदृष्ट्या वन्यपशूनां सुरक्षां सुनिश्चित्य आधुनिकवेगविज्ञापकाः, विशेषपशु-अन्तर्मार्गाः च स्थापिताः सन्ति ।

# स्वामिविवेकानन्द-कनिष्ठमहाविद्यालये "युवास्पन्दन-२०२५" इति स्नेहसंमेलनस्य हर्षोल्लासेन उद्घाटनम्






**हिमसंस्कृतवार्ता।** जलगाव-नगरे स्थिते स्वामिविवेकानन्द-कनिष्ठमहाविद्यालये प्रतिवर्षवत् "युवास्पन्दन-२०२५" इति स्नेहसंमेलनस्य आयोजनं दिनाङ्के १८ तथा १९ डिसम्बर २०२५ तमे वर्षे कृतम्। अस्य स्नेहसंमेलनस्य भव्यं उद्घाटनं दिनाङ्के १८ डिसम्बर तमे दिने हर्षोल्लासेन सम्पन्नम्।उद्घाटनसमारोहस्य प्रमुखातिथिरूपेण के.सी.ई. सोसायटी, जलगाव इत्यस्याः शैक्षणिक-सञ्चालिका डा.मृणालिनी फडणवीस महोदया उपस्थिताभूत्। समारोहस्य अध्यक्षस्थाने महाविद्यालयस्य शैक्षणिक-सांस्कृतिक-समन्वयकः प्रा. शशिकान्त वडोदकर आसीत्। अस्मिन् अवसरे उपप्राचार्यः प्रा. आर. बी. ठाकरे, पर्यवेक्षिका प्रा. स्वाती बऱ्हाटे, समन्वयकः प्रा. उमेश पाटील, स्नेहसंमेलन-प्रमुखा प्रा. वर्षा पाटील उपाध्यक्षः प्रा. संदीप वानखेडे च उपस्थिताः आसन्।कार्यक्रमस्य आरम्भः दीपप्रज्वलनेन सरस्वती-प्रतिमायाः पूजया च अभवत्। विद्यार्थिभिः सादरितेन स्वागतगीतेन वातावरणं सुमधुरं कृतम्। उद्घाटनसमारोहस्य सूत्रसञ्चालनं प्रा. रूपम निळे महोदयेन कृतम्, आभारप्रदर्शनं च प्रा. किरण महाजन महोदयेन कृतम्।प्रमुखातिथिः डा.मृणालिनी फडणवीस महोदया अवदत् यत्—स्नेहसंमेलनं विद्यार्थिनां सुप्तकलागुणानां विकासाय उत्तमं व्यासपीठं भवति। शैक्षणिक-संपादनस्य सह व्यक्तित्वविकासेऽपि एते कार्यक्रमाः महत्त्वपूर्णाः सन्ति। अध्यक्षीय-भाषणे प्रा. शशिकान्त वडोदकर महोदयेन शैक्षणिक-विकासेन सह कलात्मक-विकासस्य आवश्यकतां प्रतिपादितम्।ततः अनन्तरं विविधाः स्पर्धाः आयोजिता अभवन्। "महिला-सुरक्षा" इति विषयः प्रमुखाकर्षणकेंद्ररूपेण उदभवत्। रङ्गोली-प्रतियोगितायां ३७ विद्यार्थिनः सहभागीभूताः। "अयोध्यायाः रामः", "शिवराजः", "स्त्री-भ्रूणहत्या" इत्यादि विषयेषु निर्मिताः रङ्गोलयः प्रेक्षकान् आकृष्टवन्तः। मेहन्दी-प्रतियोगितायां २९ विद्यार्थिनः सहभागीभूताः, येषां मध्ये अरेबिक-मेहन्दी-शैली विशेषतया मनोहराभवत्।काव्यपाठन-उत्स्फूर्तभाषण-प्रतियोगितासु विद्यार्थिभिः उत्कृष्टं सादरीकरणं कृतम्। ईशान्त-साळी इत्यस्य "रामः" इति कविता, पूर्वा-भारम्बे इत्यस्याः "मुलगी जे आईचे रूप असते" इति भावपूर्णा कविता, झीनत्-पिंजारी इत्यस्याः "जो अपना सा लगता है" इति कविता च विशेषतया प्रशंसिताः।हास्यप्रधान-क्रीडाः, खाद्य-महोत्सवः, गरबा-नृत्यम् तथा "यादों की बारात" इति गीतकार्यक्रमः स्नेहसंमेलनस्य शोभां वर्धितवन्तः। "वन्दे मातरम्" इति गीतस्य १५० वर्षपूर्त्यवसरे सर्वैः प्राध्यापकैः विद्यार्थिभिः च सामूहिकरूपेण वन्देमातरम्-गीतस्य गायनेन राष्ट्रभक्त्या मानवन्दना दत्ता। स्नेहसंमेलनस्य द्वितीयो दिवसः भविष्यति। अस्मिन् दिने भारतीय-प्रादेशिक-पारम्परिक-वेशभूषा-प्रतियोगिता, नृत्यकला-प्रतियोगिता, गीतगायन-वादन-प्रतियोगिताश्च आयोजिता भविष्यन्ति। स्नेहसंमेलनस्य समारोपः वार्षिक-पारितोषिक-वितरण-समारोहेण भविष्यति। अस्य समारोपसमारोहस्य प्रमुखातिथिरूपेण ॲड्. प्रविणचन्द्र जंगले, सहसचिवः, के.सी.ई. सोसायटी, जलगाव, उपस्थितो भविष्यति।

# भारतीय- ऋषीणां दिव्यता प्रश्नोत्तररूपेण (संस्कृतम्)

येन ऋषिणा समुद्रः पीतः- महर्षिः अगस्त्यः
यस्मै परशुरामेण पृथिवी दत्ता- महर्षिः कश्यपः
येन कुंतीदेव्यै वरदानं दत्तम्- महर्षिः दुर्वासा
यस्य अस्थिभ्यः वज्रं निर्मितम्- महर्षिः दधीचिः
परशुरामस्य पिता तथा शंकरस्य अवतारः- महर्षिः जमदग्निः
चन्द्रमसः पिता- महर्षिः अत्रिः
महर्षेः वेदव्यासस्य पिता- महर्षिः पराशरः
येन ग्रह-नक्षत्र-भविष्यशास्त्रस्य अध्ययनं कृतम्- महर्षिः भृगुः
यस्य तपः मेनकया भङ्गीकृतम्- महर्षिः विश्वामित्रः
विष्णोः अवतारस्य वामनस्य पितरौ- माता अदितिः/ पिता- कश्यपः
श्रीरामस्य गुरुः- महर्षिः वसिष्ठः
श्रीकृष्णस्य गुरुः- महर्षिः सान्दीपनिः
कौरव-पाण्डवानां गुरुः- द्रोणाचार्यः
द्रोणाचार्यस्य, भीष्मपितामहस्य च गुरुः- भगवान् परशुरामः
येन शकुन्तलायाः पालनं कृतम्- महर्षिः कण्वः
येन अणु-रेणु-सिद्धान्तस्य अध्ययनं कृतम्- महर्षिः कणादः
यस्य नाम्ना पक्षी प्रसिद्धः- महर्षिः भरद्वाजः
येन लवकुशयोः पालनं कृतम्- महर्षिः वाल्मीकिनः
यस्य स्मरणार्थं गुरुपूर्णिमा आचर्यते- महर्षिः वेदव्यासः
येन गणपतिस्तोत्रं विरचितम्- महर्षिः मुद्गलः

sudha_sathaye@yahoo.com



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# संस्कृतसंवादवार्ताः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। भवत्याः मधुरं वचनं मया श्रुतम्। अद्य प्रथमा वार्ता भोजन-विषये वर्तते। प्रायः पाश्चात्यैः चिन्तितं यत् 'किलाटः' (cheese) स्वास्थ्यस्य कृते हानिकारकः। किन्तु नूतन-पाश्चात्य-गवेषणया एतत् मतं खण्डितम्।

**नन्दिनी-** हास्यास्पदम्! भारतविपरीतं पाश्चात्यैः विचारितं यत् किलाटः तु त्याज्यः एव। वैज्ञानिकैः किं दृष्टम्?

**काव्या-** तैः प्रमाणीकृतं यत् एतस्य खाद्यस्य सेवनेन वृद्धावस्थायां मस्तिष्कस्य स्वास्थ्यं वर्धते। अतः एतत् भोजनं बुद्धि-रक्षणाय उपयुक्तम् इति तैः घोषितम्।

**काव्या-** किलाट-सेवनेन मस्तिष्कं तु पुष्टं भवेत्, किन्तु वायु-प्रदूषणेन हृदयस्य हानिः जायते। इदानीं अमेरिका-देशस्य 'लॉस-एन्जलिस' (Los Angeles) नगरस्य वार्ता श्रूयताम्। तत्र भीषणः 'दावाग्निः' (wildfire) प्रवृत्तः आसीत्।

**नन्दिनी-** आम्, मया अपि तत् दूरदर्शने दृष्टम्। तत् तु भयावहम् आसीत्। किन्तु तत्र चिकित्सकैः किं विशेषं लक्षितम्?

**काव्या-** तैः अवधारितं यत् अग्नेः कारणात् तत्र हृदय-रोगिणां श्वास-रोगिणां च सङ्ख्या सहसा वर्धिता। धूम-ग्रहणेन जनानां फुप्फुसयोः (lungs) उपरि गम्भीरः आघातः जातः।

**नन्दिनी-** कष्टकरं खलु! अग्नेः ज्वाला तु शान्ता भवेत्, किन्तु धूमेन जनितः रोगः चिरं तिष्ठति।

**काव्या-** धूमेन जनितः रोगः तु कष्टकरः, किन्तु आशायाः किरणः अन्यत्र दृश्यते। इदानीं 'मानवीय-प्रतिरक्षापूर्णता-विषाणोः' (HIV) विषये शुभा वार्ता वर्तते।

**नन्दिनी-** एतत् तु महदाश्चर्यम्। मया तु श्रुतं यत् एषः रोगः असाध्यः। वैज्ञानिकैः किं नूतनम् औषधं निर्मितम्?

**काव्या-** औषधं न, किन्तु तैः शरीरे एकः विशिष्टः 'प्रोभूजिनः' (protein) अन्विष्टः। एतस्य प्रयोगेण सुप्तः विषाणुः पुनः जागृतः भवति।

**नन्दिनी-** विषाणोः जागरणम्? एतत् तु विपत्तिकरं प्रतिभाति! सुप्तः शत्रुः तु वरम् खलु?

**काव्या-** न हि। यदा विषाणुः सुप्तः, तदा औषधेन तस्य नाशः न भवति। प्रतिरक्षा-तन्त्रं तं जागृतम् एव मारयितुं शक्नोति। इयं 'प्रबोधन-मारण' नीतिः तैः स्वीकृता।

**काव्या-** सः 'प्रोभूजिनः' तु रक्षकः सिद्धः, किन्तु अन्यत्र अस्माकं ज्ञानं परिवर्तितम्। इदानीं सौर-मण्डलस्य 'शनि-ग्रहस्य' (Saturn) उपरि दृष्टिः पातिता। तस्य 'टाइटन्' (Titan) नामके उपग्रहे पूर्वं समुद्रः अस्ति इति तर्कितम्।

**नन्दिनी-** आम्, मया अपि पठितं यत् तत्र जलं भवितुम् अर्हति। तत्र जीवस्य सम्भावना अपि अस्ति खलु?

**काव्या-** किन्तु नूतन-अध्ययनेन एतत् खण्डितम्। तत्र विशालः समुद्रः नास्ति, अपितु केवलं 'हिम-कर्दमः' (slush) अथवा अर्ध-द्रव-शिला विद्यते।

**नन्दिनी-** तर्हि तु तत्र जीव-अन्वेषणं व्यर्थम् इव जातम्। एषा वार्ता तु निराशा-जनिका।

**काव्या-** टाइटन्-विषये यद्यपि आशा भग्ना, तथापि नूतन-ज्ञानं तु प्राप्तम् एव। विज्ञानस्य एषा एव रीतिः। अद्यतन-वार्ता-कार्यक्रमः अत्रैव समाप्तः।

**नन्दिनी-** सत्यम्। अद्य अस्माभिः विविधा रोचकवार्ताः ज्ञाताः। श्वः पुनः नूतन-वार्ताभिः सह उपस्थितौ भविष्यावः। तावत् शुभम् अस्तु।नमोनमः